# राष्ट्रियसंस्कृतसंस्थानम्

## आचार्य-प्रथमवर्षे द्वितीयसत्रार्द्धः (वेदः) तृतीयपत्रम्

(का.श्रौ.सूत्रे द्वितीयाध्यायः, ऋ.भा.भूमिकायां मन्त्रब्राह्मणात्मकत्वं वेदस्य इति प्रकरणात् ग्रन्थसमाप्तिं यावत्)

### प्रश्नकोषः

**लघूत्तरीयप्रश्नोत्तराणि –**

1. कात्यायनश्रौतसूत्रग्रन्थे द्वितीयाध्याये कति कण्डिकाः सन्ति ?
   द्वितीयाध्याये अष्टौ कण्डिकाः सन्ति।
2. द्वितीयाध्यायस्य प्रथमं सूत्रं किम् ?
   पूर्वां पौर्णमासीमुत्तरां वोपवसेत्। इति।
3. द्वितीयाध्याये किं वर्ण्यते ?
   दर्शपूर्णमासेष्टिः वर्ण्यते।
4. अग्न्यन्वाधानं केन कर्तव्यम् ?
   अध्वर्युणा यजमानेन वा कर्तव्यम्।
5. अग्न्यन्वाधानमन्त्रः कः ?
   ममाग्ने वर्चो विहवेष्वस्तु........ जयेम॥ इति
6. व्रतोपायनीयम् इति शब्देन किमुच्यते ?
   व्रतं भोजनं येन अन्नेन अमाषादिना क्रियते तत् व्रतोपायनम्।
7. ब्रह्मवरणं केन मन्त्रेण कर्तव्यम् ?
   भूपते भुवनपते महतो भूतस्य पते। ब्रह्माणं त्वा वृणीमहे॥ इति मन्त्रेण कर्तव्यम्।
8. ब्रह्मणः वाग्यमलोपे किं जप्तव्यम् ?
   ब्रह्मणः वाग्यमलोपे प्रायश्चित्तार्थं वैष्णवं मन्त्रं जपेत्।
9. अपां प्रणयनाय अनुज्ञां कः ददाति ?
   प्रणय यज्ञं देवत वर्धय त्वं..... धेहि। ओम् प्रणय। इति ब्रह्मा अनुज्ञां ददाति।
10. प्राशित्रावेक्षणमन्त्रः कः ?
    मित्रस्य त्वा चक्षुषा प्रतीक्षे। इति ब्रह्मा प्राशित्रं पश्यति।
11. दर्शपूर्णमासे कति ऋत्विजः भवन्ति ?
    चत्वार ऋत्विजः भवन्ति।
12. चतुर्णाम् ऋत्विजां नामानि लिखत ?
    अध्व्वर्युः, ब्रह्मा, होता, आग्नीध्रश्चेति चत्वार ऋत्विजः।
13. कतिपय श्रौतयज्ञपात्राणां नामानि लिखत ?
    स्फ्यः, कपालानि, अग्निहोत्रहवणी, शूर्पम्, कृष्णाजिनम्, शम्या, उलूखलम्, मुसलम्, दृषत्, उपला चेत्यादि।

Compiled by **Dr. D. Dayanath**, Asst. Professor, Dept. of Veda, Rashtriya Sanskrit Sansthan, Lucknow Campus
Mob: 9419295841 Email: sridayanath@gmail.com

14.स्वरभिविख्येषम् इति मन्त्रेण अध्वर्युः किं कुर्यात् ?
अनेन मन्त्रेण शकटस्थः अध्वर्युः पूर्वस्यां दिशि अवलोकयेत् ।

15.उत्पवनमन्त्रः कः ?
सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । इति ।

16.हविष्कृत् कः ?
यजमानपत्नी आग्निध्रो वा ।

17.फलीकरणं नाम किम् ?
उलूखले हविष्करणं, कण्डनम्, उद्वापः, निष्पवनम्, विवेचनं कणादिनिष्कासनमित्यादि फलीकरणमिति उच्यते । फलीकरणं त्रिवारं कर्तव्यम् ।

18.उपसर्जनीः इत्युक्ते किम् ?
पिष्टसंयवनार्था अपः (आग्नीध्रः गार्हपत्ये अधिश्रयेत्)

19.पर्यग्निकरणं नाम किम् ?
द्रव्यं परितः उल्मुकं भावयेत् । तदिदं कर्म पर्यग्निकरणमिति उच्यते ।

20.पत्नीसंनहनमन्त्रः कः ?
अदित्यै रास्नासि इति ।

21.आज्यावेक्षणमन्त्रः कः ?
तोजोऽसि शुक्रमस्यमृतमसि । इति ।

22.कल्पसूत्राणि कति विधानि ?
चतुर्विधानि । श्रौत-गृह्य-धर्म-शुल्बभेदेन ।

23.मन्त्रब्राह्मणयोर्वेदनामधेयम् इति केन उक्तम् ?
महर्षिणा आपस्तम्बेन उक्तम् ।

24.मन्त्रस्य लक्षणं किम् ?
याज्ञिकसमाख्या मन्त्रः ।

25.ब्राह्मणस्य लक्षणं किमुक्तम् ?
मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः ।
अन्यद् ब्राह्मणमित्येतद् भवेत् ब्राह्मणलक्षणम् ॥ इति । (जै.न्या.माला)

26.जैमिनिना मन्त्रब्राह्मणयोः लक्षणं किमुक्तम् ?
तच्चोदकेषु मन्त्राख्या । शेषे ब्राह्मणशब्दः । इति ।

27.ऋङ्मन्त्राणां लक्षणं किम् ?
तेषामृग्यत्रार्थवशेन पादव्यवस्था । इति ।

28.साममन्त्राणां लक्षणं किम् ?
गीतिषु सामाख्या । इति ।

29.यजुर्मन्त्राणां लक्षणं किम् ?

शेषे यजुः शब्दः । इति ।

30.ऋक्-साम-यजुषां लक्षणं किम् ?

नर्क्सामयजुषां लक्ष्म साङ्कर्यादिति शङ्किते ।

पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्वसङ्करः ॥ (जै.न्या.माला)

31.स्थाणुरयं भारहारः इत्यत्र स्थाणुशब्देन किमुच्यते ?

छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुशब्देन उच्यते ।

32.'उत त्वः पश्यन्' इति मन्त्रः कस्मिन् वेदे अस्ति ?

ऋग्वेदे 10.74.4 मध्ये अस्ति ।

33.अपूर्वसिद्धान्तः कस्मिन् शास्त्रे वर्तते ?

पूर्वमीमांसाशास्त्रे ।

34.व्याकरणशास्त्रस्य प्रयोजनं किम् ?

रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ।

35.शिक्षायाः लक्षणं सायणेन किमुक्तम् ?

स्वरवर्णाद्युच्चारणप्रकारः यत्र उपदिश्यते सा शिक्षा ।

36.कल्पस्य व्युत्पत्तिः सायणेन कथं प्रदर्शिता ?

कल्प्यते समर्थ्यते यागप्रयोगः अत्र इति कल्पः ।

37.निरुक्तस्य लक्षणं किमुक्तं सायणाचार्येण ?

अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् ।

38.सायणस्य गुरोः नाम किम् ?

श्रीविद्यातीर्थस्वामी ।

39.छन्दःसूत्रस्य प्रणेता कः ?

श्रीपिङ्गलाचार्यः ।

40.जैमिनीयन्यायमाला इति ग्रन्थस्य रचयिता कः ?

श्रीमाधवाचार्यः ।

41.पूर्वार्चिक-उत्तरार्चिकभेदेन विभक्तः वेदः कः ?

सामवेदः ।

42.आचार्यसायणकृतवेदभाष्यस्य नाम किम् ?

माधवीयवेदार्थप्रकाशः ।

43.सायणाचार्यस्य गोत्रं किमासीत् ?

भारद्वाजगोत्रोत्पन्नः आसीत् ।

44.वेदार्थोपकारिणां षण्णां वेदाङ्गानां नामानि लिखत ?

शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषम् चेति षडङ्गानि ।

Compiled by **Dr. D. Dayanath**, Asst. Professor, Dept. of Veda, Rashtriya Sanskrit Sansthan, Lucknow Campus
Mob: 9419295841 Email: sridayanath@gmail.com

45.चतुर्दशविद्यास्थानानि कानि ?

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

46.ऋग्वेदे कति मण्डलानि सन्ति ?

दश मण्डलानि सन्ति ।

47.सायणस्य ज्येष्ठभ्रातुः नाम किम् ?

श्रीमन्माधवाचार्यः ।

48.मीमांसाशास्त्रे प्रथमं सूत्रं किम् ?

अथातो धर्मजिज्ञासा । इति ।

49.पूर्वमीमांसायाः प्रवर्तकः ऋषिः कः ?

महर्षिजैमिनिः ।

50.मीमांसासूत्राणि कति अध्यायेषु विभक्तानि सन्ति ?

द्वादशाध्यायेषु विभक्तानि सन्ति ।

51.सायणाचार्यः प्रथमं कस्याः संहितायाः भाष्यं व्यरचयत् ?

कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायाः भाष्यं प्रथमं व्यरचयत् ।

52.मीमांसासूत्रस्य भाष्यकर्तुः नाम किम् ?

श्रीशबरस्वामी ।

53.अध्व्वर्युवेदः इति कस्य वेदस्य व्यवहारः ?

यजुर्वेदस्य एव अध्व्वर्युवेद इति व्यवहारः ।

54.परिसंख्यालक्षणं किम् ?

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

55.अपराविद्याः काः कीर्तिताः ?

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ।

56.पराविद्या इत्यनेन किमुच्यते ?

अथ परा यया तदक्षरमधिगम्यते । इति । परमपुरुषार्थभूतब्रह्मज्ञानहेतुभूता उपनिषदः पराविद्या इत्युच्यते ।

57.ईशावास्योपनिषद् कस्यां संहितायां वर्तते ?

शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः चत्वारिंशत्तमेऽध्याये वर्तते ।

58.छन्दःसूत्रग्रन्थस्य प्रणेता कः ?

पिङ्गलाचार्यः ।